# संस्कृतवार्ता:

दिनाङ्क :-  10/02/2025 सायम्  - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- प्रधानमन्त्रिणा नरेन्द्रमोदिना सुस्वास्थ्याय पौष्टिकाहारस्य आवश्यकताऽस्तीति छात्रेभ्य: परामर्शो दत्त:। परीक्षाकाले मनस्तापानां निवारणाय अपि तेन प्रत्युपाया: प्रोक्ता:।
- प्रधानमन्त्री मोदी फ्रांसामेरिकयो: द्विदेशयो: यात्रायै प्रस्थित:, श्रीमोदी श्व: पेरिसनगरे ए-आई-एक्शन इत्याख्ये शिखरसम्मेलने सहाध्यक्षतां विधास्यति।
- सदनद्वये अद्य पञ्चविंशत्यधिक-द्विसहस्र-षड्विंशत्यधिकद्विसहस्रतम-सत्रस्य केन्द्रीय-आयव्ययसंकल्पनेति विषये पुनः चर्चा समारब्धा।
- राष्ट्रपतिपदासीना द्रौपदीमुर्मुवर्या अद्य महाकुम्भावसरे त्रिवेणी-संगमस्थले पवित्रावगाहनम् अकरोत्!
- थाईलैण्डदेशे चलायमाने विशिष्ट-शरसन्धानस्पर्धाया: एशियामहादेश-चषक-स्पर्धायां महिला-कम्पाउण्ड-ओपनाख्ये वर्गे भारतस्य सरिता स्वर्णपदकं विजितवती।

---------------------------------------------

परीक्षा-पे-चर्चा

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदिल्ल्यां परीक्षा-पे-चर्चा कार्यक्रमस्य अष्टमे संस्करणे छात्रैस्सह संलापो विहित:। प्रधानमन्त्रिणा समग्रविकासे बलं ददता शिक्षाया: महत्वस्यापि समुल्लेखो विहित:। अद्य प्रसारिते एकस्मिन् दृश्यश्रव्य-सन्देशे तेन परीक्षाकाले मनस्तापानां नियन्त्रणोपायादिषु विषयेषु छात्रैस्सह संवाद: साधित:।

प्रधानमन्त्रिणा पोषणारोग्ययो: माहात्म्यमपि प्रोक्तम्। तेन सुस्वास्थ्याय बृहदन्नेन सह हरितशाकानां ग्रहणस्यापि सन्देश: छात्रेभ्य: दत्त:। तेनोक्तं यत् निद्रापि पोषणे एव आधृतास्तीति।

श्रीमोदी छात्रैस्सह सम्वादमपि अकरोत् तेलङ्गानाया: एकया छात्रया अनुवेला-सैतेजा इत्यनया प्रोक्तं यत् प्रधानमन्त्री-वर्यस्य वचांसि प्रेरणास्पदानि सन्ति, परीक्षा-काले च तेभ्य: सहाय्यभूतानि भविष्यन्तीति। परीक्षा-पे-चर्चा इत्यस्य संस्करणेऽस्मिन् प्रधानमन्त्रिणा सह साक्षात्संवादाय विभिन्नेभ्य: राज्येभ्य: केन्द्रशासित-प्रदेशेभ्यश्च षट्त्रिंशच्छात्रा: चिता: आसन्।

---------------------------------------------

<u>प्रधानमन्त्री-फ्रांस यात्रा</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य फ्रांसदेशस्य त्रिदिवसीययात्रायै प्रस्थितवान्। अस्मिन् यात्रावधौ श्रीमोदी पेरिसनगरे फ्रांसदेशस्य राष्ट्रपतिना इमैनुएल मैक्रों इत्यनेन सह आर्टिफिसियल इंटेलिजेंस इति शिखरसम्मेलनस्य सह-अध्यक्षतां विधास्यति। अस्मिन् सम्मेलने कृत्रिम-बुद्धिमत्ता-तन्त्र-विकास-विषये वैश्विकनेतारः उद्योगपतयः शोधकर्तारश्च समवेताः भविष्यन्ति, एतस्य कार्यक्रमस्य उद्देश्यं वैश्विक-एआई-नीतीनां साकारीकरणं नवाचारस्य च नैतिकदायित्वेन सह सर्जनं विद्यते।

प्रधानमन्त्री नरेन्द्रमोदी स्वकीये प्रस्थानवक्तव्ये उक्तवान् यत् तस्य यात्राया: द्विपक्षीयोऽयं खण्ड: राष्ट्रपतिना मैक्रों इत्यनेन सह भारत-फ्रांसयो: रणनीति-सम्बद्धाय सहयोगाय सप्तचत्वारिंशदधिक-द्विसहस्रतमवर्षान्तस्य भूस्तरीयायां रूपरेखायां प्रगते: समीक्षाया: अवसरमेकं प्रदास्यतीति।

प्रधानमन्त्री अमेरिकीराष्ट्रपतिना डोनाल्ड ट्रम्प इत्यनेन प्रदत्त निमंत्रणे द्विदिवसीय यात्रायै अमेरिकादेशं प्रति गमिष्यति। ध्यातव्यमस्ति यत् ट्रम्पस्य निर्वाचनानन्तरं प्रथमैषा प्रधानमन्त्रिण: यात्रा वर्तते।

---------------------------------------------

लोकसभा-बजटचर्चा :

लोकसभायाम् अद्य पञ्चविंशत्यधिक द्विसहस्र-षड्विंशत्यधिकद्विसहस्रतम-सत्रस्य केन्द्रीय-आयव्ययसंकल्पनेति विषये पुनः चर्चा समारब्धा। भाजपेति दलस्य सांसदः अनुरागसिंह-ठाकुरः आयव्ययसंकल्पना-पत्रस्य प्रशंसाम् अकरोत्, उक्तवाञ्च यत् प्रत्येकस्य क्षेत्रस्य कृते अभिलेखात्मके आयव्ययसंकल्पना-पत्रे आवण्टनं कृतमस्ति तथा च एषा आयव्ययसंकल्पना राष्ट्रकल्याणाय अस्ति। सः अवदत् यत्, एनडीए इत्यस्मिन् सर्वकारे भारतीय-अर्थव्यवस्था नूतनानि कीर्तिमन्ति विरच्य पञ्चमे स्थाने अस्ति। आगामिषु वर्षत्रयेषु भारतं तृतीयं बृहत्तमं अर्थव्यवस्था भविष्यतीति सः विश्वासं प्रकटितवान् । पूर्व-यूपीए-सर्वकारस्योपरि आरोपान् प्रत्यारोपयन् श्रीठाकुरः अवदत् यत् पूर्वं सर्वकारे भ्रष्टाचारं प्रचलति स्म, किन्तु अधुना विकसितभारतस्य लक्ष्यावाप्तये सर्वकारः कार्यं कुर्वन्नस्तीति।

---------------------------------------------

आरएस-बजटः

राज्यसभा अस्य वित्तीयवर्षस्य अद्य सामान्य- अर्थ संकल्पना पत्रस्य विषये चर्चां कृतवती। चर्चायाः आरम्भं कुर्वन् काङ्ग्रेसदलस्य पी.चिदम्बरम् इति उक्तवान् यत् सकलगृहोत्पादे देशस्य निर्माणस्य भागः वर्तमानशासने पतितः अस्ति। श्रीचिदम्बरम आर्थिकसर्वेक्षणस्य पञ्चविंशत्यधिकद्विसहस्रतम वर्षस्य उद्धृत्य चतुर्दशाधिकद्विसहस्रतमे वर्षे विनिर्माणस्य भागः पंचदश दशमलव. शून्यं सप्त प्रतिशतं आसीत् किञ्च नवदशाधिकद्विसहस्रतमे वर्षे त्रयोदश दशमलव चतुः त्रीणि प्रतिशतं यावत् न्यूनीभूतः, सः अपि आरोपितवान् यत् सर्वकारेण वृत्यभावविषये स्पष्टा: दत्तांशा: न दत्ता:। अमेरिकीदेशात् भारतीयराष्ट्रीयानाम् निर्वासनस्य विषये अपि सः सर्वकारस्य आलोचनां कृतवान् । काङ्ग्रेससदस्यानां आरोपाणाम् उत्तरं दत्त्वा सदनस्य नेत्रा जे.पी.नड्डा इत्यनेन विनिर्माणसहिताः विभिन्नक्षेत्रेषु सर्वकारेण कृता: अनेके: उपाया: सूचीबद्धा: कृता: ।

---------------------------------------------

राष्ट्रपति: महाकुम्भ

सम्प्रति महाकुम्भवार्ता:

राष्ट्रपतिपदासीना द्रौपदीमुर्मुवर्या अद्य महाकुम्भावसरे त्रिवेणी-संगमस्थले पवित्रावगाहनम् अकरोत् तया गंगा-यमुना-सरस्वतीति नदीषु अर्चना विहिता। तया सह उत्तरप्रदेशस्य राज्यपालवर्या आनन्दीबेनपटेल इत्येषा मुख्यमन्त्री योगी आदित्यनाथश्च समुपस्थितौ आस्ताम्। राष्ट्रपतिना सामाजिकसञ्चारजाले सम्प्रेषिते सन्देशे उक्तं यत् महाकुम्भ: मानवतायै एकतया सह आध्यात्मिकतायाश्च सन्देशो ददाति।

रेलमन्त्रिणा अश्विनी-वैष्णवेन अद्य माघपूर्णिमाया: स्नानात् प्राक् प्रयागराजरेलस्थानकस्य प्रबन्धनं निरीक्षितम्।

वार्ताहरै: सह भाषमाणेन श्रीवैष्णवेन उक्तं यत् प्रशासनेन महाकुम्भाय नगरस्य अष्टसु रेलस्थानकेषु व्यापकप्रबन्धनानि सन्ति विहितानि। रेलमन्त्रालयेन वार्तावृन्दै: प्रसार्यमाणासु वार्तासु स्पष्टतां जनयता प्रोक्तं यत् प्रशासनेन प्रयागराजरेलस्थानकं पिहितं नास्तीति। मन्त्रालयेन उक्तं यत् मण्डलप्रशासनेन अस्य मासस्य चतुर्दश-दिनाङ्कं यावत् प्रयागराज-संगम-रेलस्थानकं गमनागमनायै पिहितं स्थास्यतीति। मन्त्रालयेन प्रोक्तं यत् अन्येषु अष्टसु रेलस्थानकेषु च यथावत् रेलयानानि गमनागमने संलग्नानि स्थास्यन्तीति।

उत्तराखण्डस्य मुख्यमन्त्री पुष्करसिंहधामी अद्य संगमस्थले पवित्रस्नानम् अकरोत्। अवसरेऽस्मिन् स: सपरिवारं समुपस्थित: आसीत्। अवसरेऽस्मिन् तेन पुण्यनदीनां पूजनानन्तरम् उक्तं यत् इदं धार्मिक-महापर्व अस्तीति। सहैव हि तेन पुण्यस्नानस्य माहात्म्यपि प्रोक्तं।

--------------------------------------------

<u>शरसन्धानस्पर्धा</u>

थाईलैण्डदेशे चलायमाने विशिष्ट-शरसन्धानस्पर्धाया: एशियामहादेश-चषक-स्पर्धायां महिला-कम्पाउण्ड-ओपनाख्ये वर्गे भारतस्य सरिता स्वर्णपदकं विजितवती। सरितया अद्य सिंगापुरस्य नूरसियाहिदा-अलीम-इत्यस्यां सन्निकटे संघर्षे त्रिचत्वारिंशदधिकैकशताङ्कै: एकाङ्काधिक्येन जयो लब्ध:। तत्रैव पुरुषवर्गे भारतस्य आदिलमोहम्मदनजीर-अंसारी इत्यनेन च कांस्यपदकम् लब्धम्।

--------------------------------------------

## पादकन्दुक स्पर्धा

पादकन्दुकस्य आईएएसएल इति स्पर्धायाम् अद्य भुवनेश्वरस्य कलिङ्गाक्रीडाङ्गणे ओडिशा एफसी इत्यस्य संघर्षः पञ्जाबएफसी इति दलेन सह भविष्यति। सम्प्रति ओडिशादलं एकोनविंशतिक्रीडासु पञ्चविंशति अङ्कैः सह सप्तमे स्थाने अस्ति1

।। इति वार्ता:।।